# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः – पुराणेतिहासः** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – अग्निपुराणम् १६८-२००, गरुडपुराणम् २०५-२२९** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ दण्डं कुर्यान्नृपो नृणां प्रायश्चित्तमकुर्वताम्।
कामतोऽकामतो वाऽपि प्रायश्चित्तं कृतं चरेत्॥

२ सर्वस्वं वा वेदविदे ब्राह्मणायोपपादयेत्।
व्रतैरेतैर्व्यपोहन्ति महापातकिनो मलम्॥

३ यन्मया चिन्तितं दुष्टं स्वचित्तवशवर्तिना।
अकार्यं महदत्युग्रं तच्छमं नय केशव॥

४ बहूनामेककार्याणां सर्वेषां शस्त्रधारिणाम्।
यद्येको घातकस्तत्र सर्वे ते घातकाः स्मृताः॥

**प्रश्नः २** विविधपापप्रायश्चित्तानि यथाग्रन्थमुपपादयत।

**प्रश्नः ३** श्रीविष्णोः पापप्रणाशनस्तोत्रसारं वर्णयत।

**प्रश्नः ४** बुधाष्टमीव्रतकथनं विधीयताम्।

**प्रश्नः ५** एकादशी-द्वादशीव्रतयोः फलसारमुपपादयत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे।
स्वर्गापवर्गस्य फलार्जनाय भवन्ति भूयः पुरुषाः सुरत्वात्॥

२ विप्रा मन्त्राः कुशा वह्निस्तुलसी च खगेश्वर।
नैते निर्माल्यतां यान्ति क्रियमाणाः पुनः पुनः॥

३ अनादिनिधनो देवः शङ्खचक्रगदाधरः ।
अक्षयः पुण्डरीकाक्ष प्रेतमोक्षप्रदो भव ॥

४ न दत्तं न हुतं तप्तं न स्नातं न कृतं हितम् ।
यादृशं चरितं कर्म मूढात्मन् भुङ्क्ष्व तादृशम् ॥

**प्रश्नः ७** मरणासन्नजनस्य श्रेयसे क्रियमाणानि कर्माणि वर्णयत ।

**प्रश्नः ८** नरकस्वरूपं विभाव्य तद्यातनां वर्णयत ।

**प्रश्नः ९** जीवस्योर्ध्वगतेः अधोगतेश्च वर्णनं कुरुत ।

**प्रश्नः १०** प्रेतकल्पसारमात्रम् उपपादयत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ महान्ति पातकानि कति प्रोक्तानि ?
२ 'ब्रह्महा' कुटीं कृत्वा कतिकालं यावत् वने वसेत् ?
३ सामान्येन धर्मः कतिधा स्मृतः ?
४ मधु-मांसानि कः वर्जयेत् ?
५ उपवासे किं न शस्यन्ति ?
६ ताम्बूलभक्षणं कदा निषिद्धम् ?
७ दिवा स्वापात् कस्य भङ्गो भवति ?
८ व्रतपरिभाषावर्णनं केन कृतम् ?
९ दुर्गतिं यान्तं के निवारयन्ति ?
१० पदं-पददानं वा कतिविधं स्मृतम् ?
११ 'श्राद्ध' शब्दस्य का व्युत्पत्तिः ?
१२ देवकार्यादपि सदा किं विशिष्यते ?
१३ स्वे-स्वे कर्मण्यभिरतः नरः किं लभते ?
१४ धर्मः कमनुगच्छति ?
१५ कुत्र सन्निहितो हरिः ?

****